2026 MASMC201/26

संस्कृतमीमांसा

MASMC201

अर्थसंग्रहः

Full Marks: 80

Time: 3 Hour

लघूत्तराणि प्रदेयानि – 1x10 = 10

1. 'अर्थसंग्रहः' केन दर्शनेन सम्बद्धोऽस्ति ?
2. लौगाक्षिभास्करस्य अपरः ग्रन्थः कः ?
3. उत्पत्तिविधेः लक्षणं प्रदीयताम्।
4. विनियोक्त्रिश्रुतिः कतिविधाः ?
5. अधिकारविधेः उदाहरणं किम् ?
6. पक्षेऽप्राप्तस्य प्रापकः कः ?
7. किम् नाम नामधेयम् ?
8. अर्थवादभेदौ कौ ?
9. 'अथ' इति पदं कस्मिन्नर्थे प्रयुज्यते ?
10. वाक्यस्वरूपं प्रदीयताम्।

अधस्थितानां पञ्चानां टिप्पणी प्रदेया - 6x5=30

11. अर्थसंग्रहः
12. विधिः
13. परिसंख्याविधिः
14. निषेधः
15. क्रमस्वरूपः
16. आरादुपकारकाङ्गत्वम्
17. नामधेये निमित्तचतुष्टयम्

निम्नप्रदत्तेषुचत्वारः प्रश्नाः समाधेयाः – 10x4 = 40

18. का भावना? सा च कतिविधा? शाब्दीभावनाविषये विस्तरेण आलोच्यताम्।
19. अर्थसंग्रहदिशा वेदलक्षणं प्रदाय तद्भेदाः संक्षेपेण आलोच्यन्ताम्।
20. विधेः त्रैविध्यं अर्थसंग्रहदिशा विशदयत।
21. अर्थवादः कः? अर्थवादानां विभागद्वयं सविस्तरं प्रतिपादयत।
22. "अथातो धर्मजिज्ञासा" इति सूत्रं विशदीक्रियताम्।
23. विनियोगविधिविषये विस्तरेण आलोच्यताम्।

****

संस्कृतमीमांसा

MASMC202

मीमांसान्यायप्रकाशः

Full Marks: 80

Time: 3 Hour

लघूत्तराणि प्रदेयानि – **1x10 = 10**

1. मीमांसान्यायप्रकाशस्य प्रणेता कः ?
2. मीमांसान्यायप्रकाशदिशा धर्मस्योदाहरणमेकं प्रदीयताम् ?
3. मीमांसान्यायप्रकाशानुसारं भावना का ?
4. शाब्दीभावनायाः तृतीयांशः कः ?
5. विधेरूदाहरणं किम् ?
6. प्रयोगविधेः लक्षणं किम् ?
7. मीमांसान्यायप्रकाशानुसारं प्रतिपत्तिकर्म किम् ?
8. मीमांसान्यायप्रकाशे सिद्धरूपाणि कानि ?
9. मीमांसान्यायप्रकाशानुसारं श्रुतिः कतिविधा ?
10. 'पुरोडाशः' इति शब्दस्य व्युत्पत्तिः का ?

अधस्थितानां पञ्चानां टिप्पणी प्रदेया - **6x5 = 30**

11. आपदेवः
12. मीमांसान्यायप्रकाशे भावना
13. उत्पत्तिविधिः
14. अर्थक्रमः
15. प्रकरणम्
16. लिङ्गस्वरूपम्
17. सन्निपत्योपकारकम्

निम्नप्रदत्तेषु चत्वारः प्रश्नाः समाधेयाः – **10x4 =40**

18. मीमांसान्यायप्रकाशस्य मङ्गलाचरणं विलिख्य व्याख्यायताम् ।
19. मीमांसान्यायप्रकाशानुसारम् आर्थीभावनायाः स्वरूपं स्पष्टयत।
20. मीमांसान्यायप्रकाशदिशा विधिलक्षणं विलिख्य तत्भेदाः आलोच्यन्ताम्।
21. को नाम क्रमः ? क्रमस्य षट्भेदा निरूप्यन्ताम् ।
22. विनियोगविधिलक्षणं उल्लिख्य सहकारि षट्प्रमाणानां परिचयो दीयताम्।
23. मीमांसान्यायप्रकाशानुसारं श्रुतिप्रमाणं किम् ? तद्विषये आलोच्यताम्।

****

संस्कृतमीमांसा

MASMC203

मीमांसादर्शनस्य प्रमुखसिद्धान्ताः

Full Marks: 80

Time: 3 Hour

लघूत्तराणि प्रदेयानि – **1×10 = 10**

1. गुरुमतस्य प्रवर्तकः कः ?
2. भाट्टाः कति प्रमाणानि मन्यन्ते ?
3. किं नाम द्रव्यम् ?
4. अभावलक्षणं प्रदीयताम् ।
5. वेदस्य लक्षणं किम् ?
6. यागस्य स्वरूपं किम् ?
7. को नाम अर्थवादः ?
8. मन्त्राणां किं प्रयोजनम् ?
9. शब्दप्रमाणं कतिविधम् ?
10. प्राभाकरसम्प्रदायः कति पदार्थान् मन्यते ?

अधस्तनेषु पञ्चानां प्रश्नानामुत्तरं प्रदेयम् - **6×5 = 30**

11. मीमांसादर्शनानुसारं प्रत्यक्षप्रमाणम् विवेचयत ।
12. कर्मविषये एका टिप्पणी प्रदीयताम् ।
13. विधिविषये एका टिप्पणी प्रदीयताम् ।
14. मीमांसाशास्त्रोक्तं नामधेयं स्पष्टयत ।
15. मीमांसादर्शनानुसारम् अनुपलब्धिप्रमाणं संक्षेपेण निरूपयत ।
16. परिसंख्यायाः दोषत्रयं प्रकटयत ।
17. विकल्पे कति दोषाः भवन्ति? ते के? निरूपयत ।

निम्नप्रदत्तेषु चत्वारः प्रश्नाः समाधेयाः – **10×4=40**

18. मीमांसादर्शनानुसारं प्रमाणविभागाः प्रतिपाद्यन्ताम् ।
19. अभावलक्षणं विलिख्य तद्भेदाः निरूप्यन्ताम् ।
20. मीमांसाशास्त्रोक्तं क्रमबोधकविधिं व्याख्यात ।
21. मीमांसाशास्त्रानुसारं धर्मप्रमाणानि आलोच्यन्ताम् ।
22. प्राभाकरसम्प्रदाये कति पदार्थाः भवन्ति ? तान् संक्षेपेण निरूप्यन्ताम् ।
23. मीमांसादर्शनस्य प्रतिपाद्यविषयाः संक्षेपेण आलोच्यन्ताम् ।

****

संस्कृतमीमांसा

UGSMDS201

संस्कृतवाङ्मयपरिचयः

Full Marks: 60

Time: $2\frac{1}{2}$ Hours

निम्नप्रदत्तानां प्रश्नानां लघूत्तराणि प्रदेयानि - 1×10=10

1. ऋग्वेदे कति मण्डलानि सन्ति ?
2. वेदाङ्गानि कति सन्ति ?
3. गोपथब्राह्मणं कस्य वेदस्य अन्तर्गतम् ?
4. छान्दोग्योपनिषद् केन वेदेन सम्बद्धा ?
5. रघुवंशस्य रचनाकारः कः ?
6. चम्पूकाव्यं किम् ?
7. निबन्धलेखनस्य भाषा कथं भवेत् ?
8. निबन्धे प्रथमभागः कः ?
9. वेदपुरुषस्य मुखरूपं वेदाङ्गं किम् ?
10. एकस्य ऋग्वेदीयब्राह्मणग्रन्थस्य नाम लिखत।

निम्नप्रदत्तेषु पञ्चानां टिप्पणी प्रदेया - 6×5=30

11. वेदः
12. शतपथब्राह्मणम्
13. रामायणम्
14. निबन्धलेखनस्य मूलावयवाः
15. वेदाङ्गानि
16. ईशावास्योपनिषद्
17. बाणभट्टः

निम्नोक्तेषु प्रश्नद्वयं समाधेयम् - 10×2=20

18. . ऋग्वेदमधिकृत्य एको लेखः प्रस्तूयताम्।
19. ब्राह्मणसाहित्यमधिकृत्य एको निबन्धः प्रस्तूयताम्।
20. . संस्कृतमहाकाव्यानां सामान्यपरिचयः दीयताम्।
21. कालिदासविषये निबन्धमेकं प्रस्तुयत।

****

संस्कृतमीमांसा

UGMIDE405

मानमेयोदयः (प्रमेयभागः)

पूर्णाङ्काः - 60

समयः – सार्धघण्टात्रयम्

सर्वे प्रश्नाः समाधेयाः

लघूत्तराणि प्रदेयानि **1×10=10**

1. मानमेयोदयग्रन्थस्य मेयभागः केन रचितः ?
2. द्रव्याणि कति सन्ति ?
3. जलस्य लक्षणं किम् ?
4. उद्भिज्जं शरीरं नास्तीति केषां मतम् ?
5. कालः कः ?
6. गुणाः कति ?
7. मनः विभुः अणुरूपं वा ?
8. संयोगः कतिविधः ?
9. भावना का ?
10. शक्तिः का ?

टिप्पणीं/व्याख्यां लिखत (केषाञ्चित् पञ्चानाम्) **6×5=30**

11. पृथिवी
12. रूपस्पर्शयोः त्रैविध्यम्
13. दिक्कालाकाशाः प्रत्यक्षाः
14. आत्मलक्षणम्
15. संयोगः
16. बुध्यादिषट्कम्
17. प्राकट्यम्

कयोश्चत्द्वयोः उत्तराणि लिखत **10×2=20**

18. तार्किकमतं विखण्ड्य तमसः दशमद्रव्यत्वं प्रतिपादयत।
19. शब्दगुणम्, तस्य विभुत्वं नित्यत्वं च निरूपयत।
20. ग्रन्थदिशा इच्छाद्वेषप्रयत्नाः निरूपणीयाः।
21. जातिः का ? मानमेयोदयदिशा वर्णयत।

****